वल्लभव्रजचन्द्रं सुभगसुचंद्रं परमानंदं भ्रांनिहरं ।
भज नंदकुवरं सर्वसुखसारं तत्त्वविचारं ब्रह्मपरम् ॥७॥
वंदितचरणयुगं पावनकरणं जगदुद्धरणं विमलेधरं ।
कालियशिरगमनं कृतफणिनमनं
घातितयमनं मृदुलतरम् ।
वल्लभदुःखहरं निर्मलचरणम् अशरणशरणं मुक्तिकरं ।
भज नंदकुमारं सर्वसुखसारं तत्त्वविचारं ब्रह्मपरम् ॥८॥
इति श्रीवल्लभाचार्यविरचितं श्रीनंदकुमाराष्टकं संपूर्णम् ।

## अथ श्रीगिरिराजधार्यष्टकम् ।

श्रीगोपीजनवल्लभाय नमः ।

भक्ताभिलाषाचरितानुसारी
दुग्धादिचौर्येण यशोविसारी ।
कुमारतानंदित घोषनारिर्मम प्रभुः
श्रीगिरिराजधारी ॥१॥
व्रजांगनावृंदसदाविहारी अंगैर्गुहांगारतमोपहारी ।
क्रीडारसावेशतमोभिसारी मम प्रभुः
श्रीगिरिराजधारी ॥२॥
वेणुस्वनानंदितपन्नगारी । रसातलानृत्यपदप्रचारी ॥

१ विमलकरं. २ घातितयमुनं इति पा० मनःप्रतिभाति.

क्रीडन् वयस्याकृतिदैत्यमारी ।
मम प्रभुः श्रीगिरिराजधारी ॥३॥

पुलिंददाराहितशंबरारी रमासदोदारदयाप्रकारी ।
गोवर्धने कंदफलोपहारी
मम प्रभुः श्रीगिरिराजधारी ॥४॥

कलिंदजाकूलदुकूलहारी कुमारिकाकामकलावितारी ।
वृंदावने गोधनवृंदचारी
मम प्रभुः श्रीगिरिराजधारी ॥५॥

व्रजेंद्रसर्वाधिकशर्मकारी महेंद्रगर्वाधिकगर्वहारी ।
वृंदावने कंदफलोपहारी
मम प्रभुः श्रीगिरिराजधारी ॥६॥

मनःकलानाथतमोविदारी वंशीरवाकारिततत्कुमारिः ।
रासोत्सवोद्वेल्लरसाब्धिसारी
मम प्रभुः श्रीगिरिराजधारी ॥७॥

मत्तद्विपोद्दामगतानुकारी लुठत्प्रसूनाप्रपदीनहारी ।
रामो[१] रसस्पर्शकरप्रसारी
मम प्रभुः श्रीगिरिराजधारी ॥८॥

इति श्रीवल्लभाचार्यविरचितं गिरिराजधार्यष्टकं संपूर्णम् ।

---

१ रामोरुसंस्प. इति पा० ममप्रतिभाति.